# Shri Nateshvarachintamanividya Stava

# श्रीनटेश्वरचिन्तामणिविद्यास्तवः

## Document Information

Text title : Shri Nateshvarachintamanividya Stava

File name : naTeshvarachintAmaNividyAstavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI. chidambararahasya mantrakalpataH

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# श्रीनटेश्वरचिन्तामणिविद्यास्तवः

श्रीगणेशाय नमः ।
श्रीचित्सभेशाय नमः ।

सनत्कुमारः -
नन्दिकेश शिवानन्यभावनाभावितान्तर ।
शिलादतनय श्रीमन् चिदम्बरसभापतेः ॥ १॥

चिन्तामणिमहाविद्यामन्त्रवर्णस्तवोत्तमम् ।
मननात्सर्वपापघ्नं नृत्तराजप्रियङ्करम् ॥ २॥

पुरुषार्थप्रदं पुंसां मोक्षदं सर्वकामदम् ।
हरिणा ब्रह्मणा देव रुद्रेणापि सुरैरपि ॥ ३॥

सदा सङ्कीर्तितं प्रेम्णा वक्तुमर्हसि तत्स्तवम् ।
श्रीनन्दिकेश्वरः -
सनत्कुमार वक्ष्यामि ब्रह्ममानससम्भव ॥ ४॥

पुरा स्कन्दाय देवेन शम्भुना प्रोक्तमद्भुतम् ।
नृत्यति यो महादेवो दहराकाशमध्यमे ॥ ५॥

तदीयमन्त्रवर्णाद्यं स्तवराजं विशेषतः ।
ब्रह्मादयोऽपि यत्स्तोत्रजपादापुर्मुनीश्वर ॥ ६॥

इष्टार्थान् वाक्पतित्वादीन् सावधानमनाः शृणु ।
अहमेव ऋषिस्तस्य छन्दोऽनुष्टुप् सभापतिः ॥ ७॥

देवता प्रणवेनैव न्यासं कृत्वा पठेत्स्तवम् ॥

वन्देऽपस्मारदेहस्थितमतिधवलं श्रीतनुं नृत्तराजं
वामेनाकुञ्चिताङ्घ्रिं डमरुकमभयं वह्निनृत्ताभिनीतिम् ।
दक्षे वामे दधानं द्विदशमथ जटाजान्हवीचन्द्रचूडं

द्वीपीद्वर्माम्बराढ्यं भुजगवलयिनं श्रीजटाढ्यापराङ्गम् ॥ ८॥

वामे हस्ते च वह्निं नयुतमथ करे दक्षिणे शिवस्वरूपं
नादब्रह्मैकनिष्ठं डमरुकमभयं यं वकारं च वामे ।
हस्ते श्रीदक्षिणेन स्वपदसरसिजेनात्ममोहं मधाम्ना
त्वाक्रम्यावस्थितं त्वां भजति हि निटिले निग्रहानुग्रहाभ्याम् ॥ ९॥

ध्यायेत्कोटिरविप्रभं त्रिणयनं शीतांशुगङ्गाधरं
दक्षाङ्घ्रिस्थितवामकुञ्चितपदं शार्दूलचर्माम्बरम् ।
वह्निं डोलकराभयं डमरुकं वामे शिवां श्यामलां
कल्हारं दधतीं प्रलम्बितकरां देवीं सभेशं सदा ॥ १०॥

वह्निं पाशं च लम्बं धनुरपि मधुरं वामहस्तैश्चतुर्भिः
बिभ्राणं चान्यहस्तैर्डमरुमपि सृणिं चाभयं पुष्पबाणान् ।
वामार्धाङ्गं पुमांसं परिचिनु हृदये स्वर्णसंसद्धकुंसं
सेवा हेवाक देवाधिपमकुटतटी लोलुठत्पादपीठम् ॥ ११॥

ओङ्कारमन्त्रसंवेद्यं ओतप्रोतजगत्त्रयम् ।
चिन्तयामि महादेवं चिदम्बर सभानटम् ॥ १२॥

ह्रीङ्कारिणीं प्रशंसन्ति यन्मायामूर्तिमास्तिकाः ।
चित्त चिन्तय तं देवं चिदम्बरसभानटम् ॥ १३॥

पश्यल्ललाटं प्रवहच्छेखरं विश्वसृट्स्रजम् ।
शिवमालोकयाम्यन्तः चिदम्बरसभानटम् ॥ १४॥

रम्भोर्वशीमुखादेव्यो यद्वामाङ्गपदानुगाः ।
तमेकं दैवतं वन्दे चिदम्बरसभानटम् ॥ १५॥

ज्योतिः प्रकटितानङ्ग गर्वनिर्वापणालिकम् ।
प्रणमामि प्रभुं शम्भुं चिदम्बरसभानटम् ॥ १६॥

तिसृभिश्शक्तिभिर्विश्वं व्यश्नुवानमनादिमम् ।
कलयामि कलातीतं चिदम्बरसभानटम् ॥ १७॥

हङ्कारदुस्सहव्याधेरगदङ्कारमादिमम् ।
अहं प्रभुं व्रजाम्याद्यं चिदम्बरसभानटम् ॥ १८॥

सदाशिवं सदाराध्यं सदाधारं सदोदितम् ।

चिरन्तनं सदा नौमि चिदम्बर सभानटम् ॥ १९॥

हन्त्रीं पुरत्रयस्याहुः यस्य शक्तिं त्रयीगिरः ।
तं नौमि स्थिरधन्वानं चिदम्बरसभानटम् ॥ २०॥

सर्वोत्तीर्णपदं यस्य न जानन्ति दिवौकसः ।
तमाश्रयेऽहं नृत्तेशं चिदम्बरसभानटम् ॥ २१॥

व्योमेति नाद इत्यात्मेत्यन्तरात्मेति यं विदुः ।
त्र्यम्बकं तं प्रत्येमि चिदम्बरसभानटम् ॥ २२॥

महीहृदयमध्यस्थं महानादविजृम्भितम् ।
चित्ते भजामि चिन्मात्रं चिदम्बरसभानटम् ॥ २३॥

व्योमकेशं व्योमपादं व्योमाख्यं व्योमविग्रहम् ।
व्योमातीतं भजे देवं चिदम्बरसभानटम् ॥ २४॥

महेश्वरं महानन्दं महानादं महोदयम् ।
मम नाथं प्रपद्येऽहं चिदम्बरसभानटम् ॥ २५॥

व्योम्नः शब्दो गुणो यस्य सप्रवृत्तिचतुष्टयः (१) ।
तमात्मानमवाप्तोऽस्मि चिदम्बरसभानटम् ॥ २६॥

म्नाधातुर्यस्य माहात्म्ये पर्यवस्यति भूयसा (२) ।
तं नत्वा कृतकृत्योऽस्मि चिदम्बरसभानटम् ॥ २७॥

शरायितरमाकान्तं धन्वायितधराधरम् ।
श्रये गुणायिताहीन्द्रं चिदम्बरसभानटम् ॥ २८॥

कति(३)वर्णद्वयं श्लिष्टं यन्मन्त्रान्तरसङ्गतम् ।
श्रीकण्ठं तं श्रयाम्येनं चिदम्बरसभानटम् ॥ २९॥

शिरोहृदयमूलेषु सुधातपशिखात्मना ।
भासमानं तमुद्वीक्षे चिदम्बरसभानटम् ॥ ३०॥

वन्दारुसुरकोटीर नीराजितपदाम्बुजम् ।
उमासखमुपासेऽहं चिदम्बरसभानटम् ॥ ३१॥

ज्योत्स्नाकमलिनीकान्त वामदक्षिणलोचनम् ।
परामृशामि परमं चिदम्बरसभानटम् ॥ ३२॥

तिर्यक्कुञ्चितवामाङ्घ्रिं तदेकाग्रोल्लसत्करम् ।
पश्याम्यभयदं पुंसां चिदम्बरसभानटम् ॥ ३३॥

रामणीयकसर्वस्वं यस्य वामाङ्गमिष्यते ।
तं नौमि शक्तिचक्रेशं चिदम्बरसभानटम् ॥ ३४॥

नन्दामि वीक्ष्य वीक्ष्येशं नवं नारायणार्चितम् ।
जैमिनीयतपोराशिं चिदम्बरसभानटम् ॥ ३५॥

दयातरङ्गितापाङ्गं दयितार्धकलेवरम् ।
प्राज्ञैर्नुतं प्रशंसामि चिदम्बरसभानटम् ॥ ३६॥

(४)नृगादिपूर्वराजेन्द्रैः पुण्यश्लोकैरभिष्टुतम् ।
निवेशयामि हृदये चिदम्बरसभानटम् ॥ ३७॥

(५)ततयोगार्णनिर्देश्यं षट्त्रिंशत्तत्त्वनायकम् ।
शेखरीकुरु चेतस्त्वं चिदम्बरसभानटम् ॥ ३८॥

परात्परतरं तत्त्वं पारेमोहं प्रतिष्ठितम् ।
भजेऽहं भावनासिद्ध्यै चिदम्बरसभानटम् ॥ ३९॥

रजस्सत्वतमोरूपगुणत्रयनिगुम्भनम् ।
आराधयाम्यनौपम्यं चिदम्बरसभानटम् ॥ ४०॥

प्रकृतिप्रत्ययात्मानं प्रकाशं परमेश्वरम् ।
सेवे शेखरितार्धेन्दुं चिदम्बरसभानटम् ॥ ४१॥

कालारिं कालयोक्तारं कामदं कामनाशकम् ।
विमृशामि विधीशानं चिदम्बरसभानटम् ॥ ४२॥

शाणोल्लीढेन्दुमणिवद्योतन्ते यस्य किङ्कराः ।
तमेव स्थापयाम्यन्तः चिदम्बरसभानटम् ॥ ४३॥

नन्दनारण्यलीला मे न कदाचन रोचते ।
यमीक्ष्य यमिनां गम्यं चिदम्बरसभानटम् ॥ ४४॥

दर्शं दर्शं प्रनृत्यामि मोहद्रुमदवानलम् ।
चिन्तितार्थप्रदातारं चिदम्बरसभानटम् ॥ ४५॥

नादपञ्चक(६)लातीतव्युष्टसौधविहारिणम् ।
नाथं नाहं विमुञ्चामि चिदम्बरसभानटम् ॥ ४६॥

(७)थस्थितानन्दसम्मेलसम्भूतगणनायकम् ।
सभाजयामि सर्वेशं चिदम्बरसभानटम् ॥ ४७॥

(८)रसाम्बुतेजःपवन व्योमार्केन्द्वात्म विग्रहम् ।
दिगम्बरेशं ध्यायामि चिदम्बरसभानटम् ॥ ४८॥

कत(९)योरैक्यमुद्भाति यस्य मन्त्राक्षरान्तरे ।
स्मरामि मन्त्रदेहं तं चिदम्बरसभानटम् ॥ ४९॥

पाशच्छेत्तारमाप्तानां प्रौढकृत्येषु पञ्चसु ।
पतिं प्रकाशयाम्यन्तः चिदम्बरसभानटम् ॥ ५०॥

दुरितध्वान्तमार्ताण्डं दुर्मोहार्णवतारकम् ।
अर्चाम्याम्नायजीवातुं चिदम्बरसभानटम् ॥ ५१॥

काम्भोजकर्णिकापीठकमनीयसुखासनम् ।
आलोकये हृदादर्शे चिदम्बरसभानटम् ॥ ५२॥

पूर्णैर्मनोरथैर्युक्ताः पूजया यस्य देहिनः ।
चित्तभित्तौ लिखाम्येनं चिदम्बरसभानटम् ॥ ५३॥

जडाजडविभेदेन जगद्यस्माद्विजृम्भते ।
प्रपन्नोऽस्मि तमात्मानं चिदम्बरसभानटम् ॥ ५४॥

यातुधानाः प्रणश्यन्ति याश्चान्याः क्षुद्रदेवताः ।
यद्ध्यानात्तमहं प्रेक्षे चिदम्बरसभानटम् ॥ ५५॥

मिथ्यासत्यपरिच्छेत्ता द्रष्टा वक्ता प्रमातृता(कः) ।
हन्ता च तं समेतोऽस्मि चिदम्बरसभानटम् ॥ ५६॥

ह्रीमामनन्ति छन्दांसि या माया सेत्यभिष्टुताम् ।
तयाऽनन्यं वरं याचे चिदम्बरसभानटम् ॥ ५७॥

शिवकामेश्वरी यस्य शृङ्गारकुलदेवता ।
शिवकामं तमिच्छामि चिदम्बरसभानटम् ॥ ५८॥

वासना विश्वशक्तीनां वामाङ्गे यस्य दृश्यते ।
अध्यक्षयाम्यधीशं तं चिदम्बरसभानटम् ॥ ५९॥

यैका मन्त्रमयी यस्य स्फुरत्ता या वियन्मयी ।

तमात्मीकुरुते चित्तं चिदम्बरसभानटम् ॥ ६०॥

नतिर्यस्य प्रसूते द्राक् सम्पत्तन्त्राणि देहिनाम् ।
नतोऽस्मि हृदयाब्जस्थं चिदम्बरसभानटम् ॥ ६१॥

मस्तकेऽब्जे सहस्रारे यः शक्त्या सह नृत्यति ।
पश्यामि तमहं भावात् चिदम्बरसभानटम् ॥ ६२॥

इत्येवं श्रीमदानन्दनटेशस्य महामनोः ।
वर्णाद्यस्तवराजोऽयं चिन्तामणिसमाह्वयः (१०)॥ ६३॥

चिन्तामणिवदिष्टार्थदायी नृत्तेश्वरप्रियः ।
प्रभातकाले पठतां मातृकावर्णसिद्धिदः ॥ ६४॥

नित्यंसङ्कीर्तयेद्धीमान् त्रिकालं च विशेषतः ।
चित्ते नृत्यति तस्येशः चिदम्बरसभानटः ॥ ६५॥

दुःस्वप्नदुःशकुनदुर्गमदुर्मनस्क-
दुष्कृत्यदुष्टतरदुःखनिकराश्च बाधाः ।
यत्कीर्तनाददतितरां प्रशमनं प्रयान्ति
श्रीनृत्तराजपदमेत्यपुनर्भवं च ॥ ६६॥

इति चिदम्बररहस्ये मन्त्रकल्पतः श्रीनटेश्वरचिन्तामणिविद्यास्तवः सम्पूर्णः ।

१. शब्दस्य प्रवृत्तयः - परापश्यन्तीमध्यमावैस्वर्यः ।
२. म्ना-अभ्यासे-(इति धातुः) । अभ्यासः - पारम्पर्येण वृत्तिः ।
३. क्तीतिसंयुक्ताक्षरपरः गुरुमुखैकवेद्यः ।
४. षोडशसु राजस्वन्यतमः इक्ष्वाकुवंश्यः ।
५. ततयोगार्णः संयुक्ततकारस्तेत्याकारकः ।
६. नादादिपञ्चकलातीतं-ब्रह्मरन्ध्रस्थानं तत्रव्युष्टं प्रभातं
सौधं - सभा तस्मिन् विहारिणं
विहरण शीलम् ।
७. “थ”-पर्वतः ।
८. रसा भूमिः । आत्मा यजमानः इति अष्टमूर्तिः ।
९. कतयोरेकवर्णाकारकं ऐक्यङ्केति।
१०. ॐ ह्रीं परञ्ज्योतिः हंस हंस व्योम व्योम व्योम्ना शक्ति शिवज्योतिरानन्द
नृत्तपरप्रकाशानन्दनाय रक्तपादुकां पूजयामि ह्रीं शिवाय नमः इति मनुः ।

Proofread by Aruna Narayanan

*Shri Nateshvarachintamanividya Stava*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*